(यथा, महाभारते । ३ । १३२ । १२ ।
"स वै तथा वक्र एवाभ्यजाय-
दष्टावक्रः प्रथितो वै महर्षिः ॥" )
वक्राणि यथा । अलकः १ भालः २ भ्रूः ३ नखचिह्नम् ४ अङ्कुशः ५ कुञ्चिका ६ भयकङ्कणम् ७ बालेन्दुः ८ हारम् ९ कुद्दालः १० चन्द्रकः ११ शुकास्यम् १२ एलाशपुष्पम् १३ विद्युत् १४ कटाक्षः १५ शक्रधनुः १६ फणा १७ प्रवोधः १८ करः १९ हस्तिदन्तः २० शूकरदन्तः २१ सिंहनखादिः २२ । इति कविकल्पलता ॥ क्रूरः । इति मेदिनी । रे, ६५ ॥

वक्रकण्टः, पुं, ( वक्राः कष्ठाः कण्टका यस्य । ) बदरवृक्षः । इति राजनिर्घण्टः ॥ ( वक्रः कण्टः । ) कुटिलकण्टकश्च ॥

वक्रकण्टकः, पुं, ( वक्राः कण्टका अस्य ।) खदिरवृक्षः । इति राजनिर्घण्टः ॥ ( विषयोऽस्य खदिरशब्दे विज्ञेयः ॥ )

वक्रखड्गः, पुं, ( वक्रः खड्गः । ) करवालः । इति राजनिर्घण्टः ॥

वक्रग्रीवः, पुं, ( वक्रा ग्रीवास्य । ) उष्ट्रः । इति त्रिकाण्डशेषः ॥

वक्रचञ्चुः, पुं, ( वक्रा चञ्चुर्यस्य । ) शुकपक्षी । इति शब्दरत्नावली ॥

वक्रतालं, क्ली, ( वक्रं तालं यत्र । ) वाद्यविशेषः । तत्पर्य्यायः । सुखवाद्यम् २ । वक्रनालमिति वा पाठः । इति त्रिकाण्डशेषः ॥

वक्रताली, स्त्री, ( वक्रताल + गौरादित्वात् ङीष् ।) सुखवाद्यम् । इति शब्दरत्नावली ॥

वक्रतुण्डः, पुं, ( वक्रन्तुण्डं यस्य । ) शुकपक्षी । इति शब्दरत्नावली ॥ ( वक्रोष्ठे, त्रि । यथा, भागवते । ६ । १ । २८ ।
"स पाशहस्तांस्त्रीन् दृष्ट्वा पुरुषानतिदारुणान् ।
वक्रतुण्डानूर्द्ध्वरोम्ण आत्मानं नेतुमागतान् ॥" )

वक्रदंष्ट्रः, पुं, ( वक्रा दंष्ट्रा यस्य । ) शूकरः । इति केचित् ॥

वक्रनक्रः, पुं, ( वक्रः कुटिलः नक्र इव हिंस्रश्च । ) पिशुनः । शुकपक्षी । इति मेदिनी । रे, २८५ ॥

वक्रनालं, क्ली, सुखवाद्यम् । इति मुद्राङ्कितत्रिकाण्डशेषः ॥

वक्रनासिकः, पुं, (वक्रा नासिका यस्य ।) पेचकः । इति त्रिकाण्डशेषः ॥ कुटिलनासायुक्ते, त्रि ॥

वक्रपुच्छः, पुं, स्त्री, ( वक्रं पुच्छं यस्य । ) कुक्कुरः । इति त्रिकाण्डशेषः ॥ सलोमकुटिललाङ्गूलश्च ॥

वक्रपुष्पः, पुं, ( वक्राणि पुष्पाण्यस्य । ) वकवृक्षः । इति शब्दरत्नावली ॥ पलाशवृक्षः । इति राजनिर्घण्टः ॥

वक्रबालधिः, पुं, ( वक्रो बालधिः केशयुक्तलाङ्गूलं यस्य । ) कुक्कुरः । इति हेमचन्द्रः । ४ । ३४४ ॥ कुटिलपुच्छश्च ॥

वक्रभणितं, क्ली, ( वक्रं कुटिलं भणितम् । ) कुटिलवाक्यम् । तत्पर्य्यायः । छेकोक्तिः २ । इति त्रिकाण्डशेषः ॥

वक्रमः, पुं, ( अवक्रमणमिति । अव + क्रम + भावे घञ् । अल्लोपः । ) पलायनम् । इति शब्दरत्नावली ॥

वक्रलाङ्गूलः, पुं, ( वक्रं लाङ्गूलं यस्य । ) कुक्कुरः । इति राजनिर्घण्टः ॥ कुटिलपुच्छे, क्ली ॥

वक्रवक्त्रः, पुं, ( वक्रं वक्त्रं मुखमस्य । ) शूकरः । इति शब्दरत्नावली ॥ कुटिलमुखविशिष्टे, त्रि ॥

वक्रशल्या, स्त्री, ( वक्रं शल्यमिव पत्रादिकं यस्याः । ) कुटुम्बिनीक्षुपः । इति राजनिर्घण्टः ॥

वक्राग्रं, क्ली, ( वक्रमग्रं यस्य । ) कवाटवक्रवृक्षः । इति रत्नमाला ॥ ॥ कुटिलाग्रभागश्च ॥

वक्राङ्गः, पुं, ( वक्रमङ्गं यस्य । ) हंसः । इति हेमचन्द्रः ॥ कुटिलावयवे, क्ली ॥ ( कुटिलावयवविशिष्टे, त्रि । यथा, हरिवंशे । १०२ । ३८ ।
"तरङ्गविषमापीड़ा चक्रवाकोन्मुखस्तनी ।
वेगगम्भीरवक्राङ्गी चलमीनविभूषणा ॥" )

वक्रिः, त्रि, मिथ्यावादी । वकधातोः क्रिन्प्रत्ययेन निष्पन्नः ॥

वक्री, [ न् ] पुं, ( वक्रो वक्रतास्यास्तीति । इनिः । वैदिकधर्म्मविरुद्धवादित्वादस्य तथात्वम् ।) बुद्धः । इति शब्दरत्नावली । वक्रताविशिष्टे, त्रि । यथा,
"लग्नेशो यदि वक्री स्यात् पुंसः कार्य्येषु वक्रता ।
लग्नेशेऽस्तं गते मर्त्यो दुःखादिव्याधिसंयुतः ॥"
इति ज्योतिस्तत्त्वम् ॥

वक्रोक्तिः, स्त्री, ( वक्रा कुटिला उक्तिः । ) काकूक्तिः । यथा, कामधेनुकल्पतरुधृतब्रह्मपुराणम् ।
"अथ हृत्ते हवोत्सर्गे दाता वक्रोक्तिभिः पदैः ।
ब्राह्मणानाह यत् किञ्चित् मयोत्सृष्टन्तु निर्ज्जने ॥
तत् कश्चिदन्यो न नयेन्न विभाज्यं यथाक्रमम् ।
न बाह्यं न च तत् चौरं पातव्यं केनचित् क्वचित् ॥"
तत्त्वप्रदीपेऽप्येवम् । वक्रोक्तिभिः काकूक्तिभिः । इति शुद्धितत्त्वम् ॥ * ॥ कुटिलोक्तिः । यथा,
"वादी व्याकरणं विनैव विदुषां धृष्टः प्रविष्टः सभां
जल्पन्नल्पमतिः स्मयात् पटुवटुभ्रूभङ्गवक्रोक्तिभिः ।
ह्रीतः सन्नुपहासमेति गणको गोलानभिज्ञस्तथा
ज्योतिर्व्वित्सदसि प्रगल्भगणकः प्रश्नप्रपञ्चोक्तिभिः ॥"
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥
( वक्रा अर्थान्तरग्रहणेन कुटिला उक्तिः । शब्दालङ्कारभेदः । तल्लक्षणादिकं यथा, साहित्यदर्पणे दशमपरिच्छेदे ।
"अन्यस्यान्यार्थकं वाक्यमन्यथा योजयेद् यदि ।
अन्यः श्लेषेण काक्वा वा सा वक्रोक्तिस्ततो द्विधा ॥
द्विधेति श्लेषवक्रोक्तिः काकुवक्रोक्तिश्च । क्रमेणोदाहरणं यथा,—
"के यूयं स्थल एव सम्प्रति वयं प्रश्नो विशेषाश्रयः
किं ब्रूते विहगः स वा फणिपतिर्यत्रास्ति सुप्तो हरिः ।
वामा यूयमहो विडम्बरसिकः कीदृक् स्मरो वर्त्तते
येनास्मासु विवेकशून्यमनसः पुंस्वेव योषिद्भ्रमः ॥"
अत्र विशेषपदस्य विः पक्षी शेषो नाग इति अर्थद्वययोगात् सभङ्गः श्लेषः । अन्यत्र तु अभङ्गः ।
"काले कोकिलवाचाले सहकारमनोहरे ।
कृतागसः परित्यागात् तस्याश्चेतो न दूयते ॥"
अत्र कयाचित् सख्या निषेधार्थे नियुक्तो नञ् अन्यया काक्वा दूयत एवेति विध्यर्थे घटितः ॥")

वक्रोष्ठिका, स्त्री, ( वक्रोष्ठोऽस्त्यस्या इति । ठन् । ईषद्धसनेन हि ओष्ठस्य वक्रता जायते अतोऽस्यास्तथात्वम् । यद्वा, वक्र ओष्ठो यस्याः । ततः स्वार्थे कन् । टापि अत इत्वम् ।) अट्टहासम् । ईषद्धास्यम् । तत्पर्य्यायः । स्मितम् २ । इति हेमचन्द्रः ॥

वक्ष, रोषसंहत्योः । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-रोषे अक०-संहतौ सक०-सेट् ।) वक्षति । इति दुर्गादासः ॥

वक्षः, [स्] क्ली, ( उच्यतेऽनेनेति । वच + "पचिवचिभ्यां सुट् च ।" उणा० ४ । २१९ । इति असुन् सुट् । वक्षतेरसुन् इति रमानाथः । धातुप्रदीपश्च ।) अङ्गविशेषः । स तु हृदयोपरिकण्ठादधोभागः । बुक् इति भाषा । तत्पर्य्यायः । क्रोड़म् २ भुजान्तरम् ३ उरः ४ वत्सम् ५ । इत्यमरः ॥ अङ्कः ६ उत्सङ्गः ७ । इति जटाधरः ॥ वक्षणम् ८ गणपीठकम् ९ । इति शब्दचन्द्रिका ॥ अपि च ।
"अथ वक्षश्च वत्सं स्यादुरो वक्षस्थले श्रयम् ।"
इति शब्दरत्नावली ॥
तस्य शुभाशुभलक्षणं यथा,—
"अन्नवान् समवक्षाः स्यात् पीनैर्व्वचोभिरूर्ज्जितः ।
वक्षोभिर्व्विषमैर्निस्वः शस्त्रेण निधनस्तथा ॥"
इति गारुड़े ६६ अध्यायः ॥
( पुं, वहतीति । वह + "वहिहाधाञ्भ्यश्छन्दसि ।" उणा० ४ । २२० । इति असुन् । सुट् च । अनड्वान् । इत्युज्ज्वलदत्तः ॥")

वक्षणं, क्ली, ( वक्षत्यनेनेति । वक्षरोषसंहत्योः + ल्युट् । ) वक्षः । इति शब्दचन्द्रिका ॥ (वाहके, त्रि । यथा, ऋग्वेदे । ६ । २३ । ६ ।
"क्रियास्म वक्षणानि यज्ञैः ।"
"वक्षणानि वाहकानि स्तोत्राणि क्रियास्म करवाम ।" इति तद्भाष्ये सायणः ॥)

वक्षोजं, क्ली, (वक्षसि जायते इति । जन् + डः । ) स्तनः । इति शब्दरत्नावली ॥ (यथा, साहित्यदर्पणे ३ परिच्छेदे ।
"मध्यस्य प्रथिमानमेति जघनं वक्षोजयोर्मन्दतां
दूरं यात्युदरञ्च लोमलतिका नेत्रार्ज्जवं धावति ।